শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধিস্ৱামি কৃতিষু

# ॥শ্রীহযগ্রীৱৱিংশতিঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীহযগ্রীৱৱিংশতিঃ ॥

কৱিতাজিতকল্লোলিকন্যকাকান্তৱক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ॥

ৱন্দে ৱেঙ্কটশেষার্যং ৱতসৱংশৈকমৌক্তিকম্।
ৱাতস্যশ্রীৱরদাচার্যৱতসং ৱতসলমানতে॥ ১ ॥

লক্ষ্মীতুরঙ্গানন! বাহৱস্তে
চত্বার এৱং ন কথং নু পাদাঃ?।
ইত্যানতশ্রীচতুরাননোক্তীঃ
শৃণ্ৱন্ হযাস্যঃ স্মিতমাতনোতি॥ ২ ॥

সুধাংশুবিম্বাত্ তৱ ৱাসভূতাত
সুধাংশুখণ্ডা দশধা ৱিলগ্নাঃ।
নখাত্মনা ত্বচ্চরণাগ্রদেশে
সুধামযীং নঃ ফণিতিং দিশন্তি॥ ৩ ॥

বিভর্তি যস্তৱাং মনুজো নিজান্তঃ
কলানিধিসস্যাত্ স ইহেতি সত্যম্।
ৱহন্নিজান্তসসততং স এষঃ
কলানিধিস্তত্র নিদর্শনং নঃ॥ ৪ ॥

জঙ্ঘা ত্বদীযা নযনাভিরামা
জঙ্ঘালতামেৱ দদাতি ৱাচাম্।
প্রৱাহভূম্নীতি ৱিভাতি চিত্তে
প্রৱাদ এৱং মহতাং ন মিথ্যা॥ ৫ ॥

নখানি যস্তে হৃদযে ৱিধত্তে
নৱানি মান্যানি মনোহরাণি।
ন খানি তস্যাপথসঙ্গতানি
ভৱন্তি ৱিদ্বত্ততিভিসস্তুতানি॥ ৬ ॥

www.prapatti.com

রম্ভাদিৱাহ্যরমণীযতনুপ্রকারা
রামা রমাসি রমণীমণিরত্র সা ত্বম্।
রম্ভাভিরামসুভগোরুগতা ভৱেম
ইত্যঙ্কগাং ৱিতনুষে নু রমাং হযাস্য!॥ ৭॥

আকুঞ্চিতাঙঘ্রিরুচিরোরুতলে নিৱিষ্টা
পাদৌ প্রসার্য ভৱদেকপদেন সাকম্।
লক্ষ্মীস্তৱ ত্রিপদভূতিমধো ৱ্যনক্তি
দিৱ্যন্যথেতি কিমিদং শ্রুতিৱাগ্ৱিরুদ্ধম্॥ ৮॥

কুক্ষিঃ কৃশস্তদুদরং পরিকীর্ত্যতেসৌ
ৱক্ষো ৱিশালমথ ভাতিতরামুদারম্।
আদ্যে জগন্তি জগতাং জননী পরস্মিন
ইত্যৌচিতী চ জনতাং নিতরাং ধিনোতি॥ ৯॥

কণ্ঠং ৱিলোক্য কমনীযমযং চ কম্বুঃ
ৱক্ষো ৱিলোক্য জগতাং জননীং তথাঙ্কে।
দ্বেধা নিজাকৃতিমহো ভৱতশ্শরীরে
লীলাৱতীমিহ ৱিভাৱ্য মুদং প্রযাতি॥ ১০॥

অঙ্কং ৱিহায তৱ দক্ষিণমাপ কস্মাত
ৱামং রমা হযমুখেতি ৱিমৃশ্য চেতঃ।
পাণিং তৱাতিমধুরং শুভবোধমুদ্রং
সংৱীক্ষিতুং ৱিশদমিত্যথ নিশ্চিনোতি॥ ১১॥

স্বামিন! করেণ কলযন্নিহ বোধমুদ্রাং
উচ্চৈঃ করেণ কলযংশ্চ সুদর্শনং কিম ?।
উচ্চৈসসুদর্শনমুপাগতশিষ্যৱর্গং
সম্বোধযস্যতিতরামিতি চিন্তযামি॥ ১২॥

অস্মিন্ করে ৱহসি শোভনবোধমুদ্রাং
অন্যত্র বোধমযকম্বুমতীৱ যুক্তম্।
অন্যত্র পুস্তকমিদং তদিৱেদমাসীত
নাসাম্প্রতং কিমপি কর্মণি তে কিল স্যাত্॥ ১৩॥

www.prapatti.com

লক্ষ্মীশ্চ শঙ্খশ্চ সমুদ্রজাতৌ
    একত্র পার্শ্বে তদিমৌ ৱিধতসে।
লক্ষ্মীং যথা ৱক্ষসি কৌস্তুভং চ
    লক্ষ্মীং চ চন্দ্রং চ যথা স্বচিত্তে॥ ১৪ ॥

চন্দ্রঃ কিলাযং হৃদযাত্তৱাভূত
    লক্ষ্মীতুরঙ্গানন! তত্ কৃতজ্ঞঃ।
অন্তর্ৱিধত্তে সততং ভৱন্তং
    কলানিধিস্তেন জগতপ্রসিদ্ধঃ॥ ১৫ ॥

চক্ষুর্গোচরতাং গতং মম সদা তত্ স্যাত্ হযাস্যং মহঃ
    মুদ্রাং বোধকরীং করেণ করযোঃ চক্রং সহস্রার্কভম্।
শঙ্খং তং ধৱলং সহস্রশশিভং পুস্তং চ হস্তে পরে
    ৱিদ্যানাং নিলযং দধত্ পরতরং ৱাগদেৱতাৱন্দিতম্॥ ১৬ ॥

শ্বেতং কিঞ্চন ৱাজিরাজৱদনং ৱাগদেৱতাৱন্দিতং
    ৱামাঙ্কস্থিতৱারিরাশিতনযং ৱেদান্তৱিদ্যানিধিম্।
চান্দ্রং বিম্বমুপাশ্রিতং শ্রিতৱশং চক্রং চ শঙ্খং তথা
    মুদ্রাং বোধকরীং চ পুস্তকমণিং বিভ্রত্ মহসসংশ্রযে॥ ১৭ ॥

স্বামিন! কিং স ভৱান্ ৱিধায ৱনিতাং ৱারাশিকন্যামিমাং
    ৱামাঙ্কে ভগৱন! দরং চ সুভগং ৱামে করে কোমলে।
তাভ্যাং ৱাচমহো! রসৌঘভরিতাং ৱ্যাখ্যানমুদ্রাং ৱহন
    প্রীত্যা তাং ৱিবৃণোতি তত্র চ পুমানুচ্চৈরধসস্ত্রী স্থিতা॥ ১৮ ॥

ৱিদ্যাং ৱিগ্রহসংযুতামিৱ রমাং ৱামাঙ্কভাগসস্থিতাং
    ৱিদ্যারূপমিমং চ শঙ্খমতুলং ৱামৈকপাণিস্থিতম্।
ৱিদ্যাধারিণমেৱ পুস্তকমণিং ৱামান্যপাণিস্থিতং
    ৱিদ্যাদানৱদান্য! ৱাজিৱদন! ত্বং রাজসে লালযন্॥ ১৯ ॥

ৱারাশেস্তনযাং ৱহন্নতিতরামানন্দপূর্ণান্তরঃ
    ৱারাশেস্তনযে ৱসন্নপি তথা সন্নন্দথোৰ্ৱারিধিঃ।
ৱাগদেৱীধৃতপাদপঙ্কজযুগো ৱাচামযং নাযকো
    ৱাচাং কাঞ্চনধোরণীমপি ৱহন্ ৱাজ্যাননো ৱর্ধতে॥ ২০ ॥

www.prapatti.com

যোষালঙ্কৃতমঞ্জুলাঙ্কমধুরঃ শেষাসনাৱস্থিতঃ
ভাষানাথসমীডিতাঙ্ঘ্ৰিযুগলো দোষাধিপান্তস্স্থিতঃ।
হেষাৱেষসমস্তৱেদনিৱহঃ ঘোষান্ ক্ষিপন্ ৱাদিনাং
শোষাযাঘজলাশযস্য নিতরাং তোষায চ স্যাত্ স নঃ॥ ২১ ॥

শ্ৰীমন! ৱাজিমুখেতি ৱারিধিসুতাসম্ভূষিতাঙ্কেতি চ
স্বামিন! ৱাগধিপেতি ৱাদৱিহৃতৌ ৱিদ্যোতমানেতি চ।
ৱারাশেরুদিতে সুধামযতনৌ ৱাসং ভজন্তং নৱং
ৱারং ৱারমিযং ভৱন্তমনঘং জিহ্বা গৃণাতু স্বযম্॥ ২২ ॥

হে লক্ষ্মীহযৱক্ত্ৰ! মামকমনস্তে মন্দুরা শোভনা
যস্মিন্ ফল্গুপদার্থলোভজডতা তৃণ্যেতি ৱিদ্যোততে।
আস্বাদ্য স্বযমঞ্জসা তৱ গিরং সন্তুষ্টচিত্তো ভৱান
কামং তত্ৰ করোতু শুদ্ধিমতি মে সেযং সতী প্ৰার্থনা॥ ২৩ ॥

হযমুখৱিংশতিরেষা
মানিধিকৱিনাথমঞ্জুৱাগুদিতা।
ৱাণীং মধুরাং সার্থাং
পঠতাং দাতুং সকৌতুকা জযতি॥ ২৪ ॥

॥ ইতি শ্ৰীহযগ্ৰীৱৱিংশতিঃ সমাপ্তা ॥

www.prapatti.com